# .. chaNDikAShTakam ..

## ॥ ચણ્ડિકાષ્ટકમ્ ॥

### Document Information

Text title : chaNDikAShTakam
File name : chandika8.itx
Category : aShTaka
Location : doc_devii
Author : umApatidvivedi
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : http://www.webdunia.com
Proofread by : http://www.webdunia.com
Latest update : November 22, 2001
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ ચણ્ડિકાષ્ટકમ્ ॥

સહસ્રચન્દ્રનિત્દકાતિકાન્ત-ચન્દ્રિકાચયૈ-
દિશોઽભિપૂરયદ્ વિદૂરયદ્ દુરાગ્રહં કલેઃ ।
કૃતામલાઽવલાકલેવરં વરં ભજામહે
મહેશમાનસાશ્રયન્વહો મહો મહોદયમ્ ॥ ૧॥

વિશાલ-શૈલકન્દરાન્તરાલ-વાસશાલિનીં
ત્રિલોકપાલિનીં કપાલિની મનોરમામિમામ્ ।
ઉમામુપાસિતાં સુરૈરૂપાસ્મહે મહેશ્વરીં
પરાં ગણેશ્વરપ્રસૂ નગેશ્વરસ્ય નન્દિનીમ્ ॥ ૨॥

અયે મહેશિ! તે મહેન્દ્રમુખ્યનિર્જરાઃ સમે
સમાનયન્તિ મૂર્દ્ધરાગત પરાગમંઘ્રિજમ્ ।
મહાવિરાગિશંકરાઽનુરાગિણીં નુરાગિણી
સ્મરામિ ચેતસાઽતસીમુમામવાસસં નુતામ્ ॥ ૩ ॥

ભજેઽમરાંગનાકરોચ્છલત્સુચામ રોચ્ચલન્
નિચોલ-લોલકુન્તલાં સ્વલોક-શોક-નાશિનીમ્ ।
અદભ્ર-સમ્ભૃતાતિસમ્ભ્રમ-પ્રભૂત-વિભ્રમ-
પ્રવૃત-તાણ્ડવ-પ્રકાણ્ડ-પણ્ડિતીકૃતેશ્વરામ્ ॥ ૪॥

અપીહ પામરં વિધાય ચામરં તથાઽમરં
નુપામરં પરેશિદૃગ્-વિભાવિતા-વિતત્રિકે ।
પ્રવર્તતે પ્રતોષ-રોષ-ખેલન તવ સ્વદોષ-
મોષહેતવે સમૃદ્ધિમેલનં પદન્નુમઃ ॥ ૫॥

ભભૂવ્-ભભવ્-ભભવ્-ભભાભિતો-વિભાસિ ભાસ્વર-
પ્રભાભર-પ્રભાસિતાગ-ગહ્વરાધિભાસિનીમ્ ।
મિલત્તર-જ્વલત્તરોદ્વલત્તર-ક્ષપાકર
પ્રમૂત-ભાભર-પ્રભાસિ-ભાલપટ્ટિકાં ભજે ॥ ૬॥

કપોતકમ્બુ-કામ્યકણ્ઠ-કણ્ઠયકંકણાંગદા-
દિકાન્ત-કાશ્ચિકાશ્ચિતાં કપાલિકામિનીમહમ્ ।
વરાંઘ્રિનૂપુરધ્વનિ-પ્રવૃત્તિસમ્ભવદ્ વિશેષ-
કાવ્યકલ્પકૌશલાં કપાલકુણ્ડલાં ભજે ॥ ૭॥

ભવાભય-પ્રભાવિતદ્ભવોત્તરપ્રભાવિ ભવ્ય
ભૂમિભૂતિભાવન પ્રભૂતિભાવુકં ભવે ।

ભવાનિ નેતિ તે ભવાનિ! પાદપંકજં ભજે
ભવન્તિ તત્ર શત્રુવો ન યત્ર તદ્વિભાવનમ્ ॥ ૮॥

દુર્ગાગ્રતોઽતિગરિમપ્રભવાં ભવાન્યા
ભવ્યામિમાં સ્તુતિમુમાપતિના પ્રણીતામ્ ।
યઃ શ્રાવયેત્ સપુરૂહૂતપુરાધિપત્ય
ભાગ્યં લભેત રિપવશ્ચ તૃણાનિ તસ્ય ॥ ૯॥

રામાષ્ટાંક શશાંકેઽબ્દેઽષ્ટમ્યાં શુક્લાશ્વિને ગુરૌ ।
શાક્તશ્રીજગદાનન્દશર્મણ્યુપહૃતા સ્તુતિઃ ॥ ૧૦॥

॥ ઇતિ કવિપત્યુપનામક-શ્રી ઉમાપતિદ્વિવેદિ-વિરચિતં ચણ્ડિકાષ્ટકં સમ્પૂર્ણમ્ ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

.. chaNDikAShTakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*